CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding for Vol. Grant-2

२५

२०२५

[redacted]

२५

Kashi Maharani Collection, Ramnagar Fort, Varanasi

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥श्रीगणेशायनमः॥ सूतउवाच॥ शृणुध्वंमुनयःसर्वेदर्दुरमाहात्म्यमुत्तमं॥
यश्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः॥१॥ दर्दुरक्षेत्रमाहात्म्यंमहापाप
प्रणाशनं॥ यस्यस्मरणमात्रेणभस्मसात्पातकंभवेत्॥२॥ मुनयःसिद्धगं
धर्वाविद्याधरमहोरगाः॥ वानप्रस्थव्रतधराश्चैवाःपाशुपतास्तथा॥३॥
वैष्णवाश्चमहात्मानःसदातिष्ठंतियत्रवै॥ दर्दुरंस्यखिलंपापंनृणांजन्म
शतोद्भवं॥तेनैतद्दर्दुरंक्षेत्रंत्रिषुलोकेषुविश्रुतं॥५॥ तत्रब्रह्माचरुद्रश्चविष्णु
स्तत्रवसंतिवै॥ निवसंतिसुराब्रह्मन्भक्तेच्छोपात्तविग्रहाः॥६॥ सर्वयज्ञेषु
यत्पुण्यंसर्वदानेषुयत्फलं॥ दर्दुरस्पर्शनात्पुंसांलभतेनात्रसंशयः॥७॥ द
र्दुरस्नानमात्रेणनरोनारायणोभवेत्॥ तत्रयद्दत्तदानंचकृतंकोटिगुणंभ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding for Vol. Grant-2

वेत्र॥८॥कलौनष्टदयापुंसःपापाचाररतामनः॥समुद्धरतिगोविंदोदर्द्
रीमास्थितःस्वयं॥९॥क्षौरंकृत्वाविधानेनदर्द्रीतीर्थेचवै॥सर्वपापविनि
र्मुक्तोविष्णुलोकंसगच्छति॥१०॥अन्यत्रयत्कृतंपापंपुंसांगंगाप्रणाशये
त्॥गंगायांतुकृतंपापंदर्द्रीनाशयेत्परं॥११॥यदादर्द्रक्षेत्रेतुगंतुंकृत
धियोजनाः॥दहंतिसर्वपापानिव्याकुलीभूयसर्वतः॥१२॥जन्मांतरस
हस्रेषुब्रह्मविर्वैरर्चितःकलौ॥तेषांदर्द्रक्षेत्रेषुवासुमिर्ज्ञानंचान्यथा॥१३
क्रोशमायामतःसर्वंतीर्थारण्यसमाकुलं॥तत्रगत्वाद्विजश्रेष्ठनमातु
स्तनपोभवेत्॥सरस्वाःसंगमोयत्रगंगयासहभार्गवि॥दशाश्वमेधिकं
पुण्यंस्नानमात्रेणकेवलं॥गर्गाश्रमंसमारभ्ययावत्पाराशराश्रमं॥ता

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वक्षेत्रंविजानीयात्पंचक्रोशंमहत्फलं॥१६॥ श्राद्धंकृत्वाप्रयत्नेननरकान्ता
रयेत्पितॄन्॥दानंदत्वायथाकामंफलंवांछितमानवः॥१७॥ दर्शनात्तस्य
विप्रेंद्रपापंहंतिदशाधिकं॥ कार्त्तिकेमासियःस्नातिसरजाःसंगमेपि
च॥ कुलकोटिंसमुद्धृत्यवैष्णवंपरमाप्नुयात्॥युगाद्यायांतृतीयायांमा
धवेमासियन्नतः॥१९॥ स्नानंदानविधंकृत्वातस्यपुण्यफलंशृणु॥अश्व
मेधसहस्राणिवाजपेयशतानिच॥२०॥ कृत्वाप्नोतियत्पुण्यंतत्फलं
स्नानमात्रतः॥ दृविभूमौरसायांचयावन्तीर्थानिभूतले॥२१॥ सर्वेसि
स्नातुमायांतिकार्त्तिकेमासिदर्शने॥ तत्रभूत्वाश्रमेतीर्थेक्रंविमलकं
परं॥२२॥ देवगंधर्वमुनिभिःसिद्धचारणसेवितं॥ निर्मलीकुरुतेयस्मा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding: MoE-IKS

दृष्ट्वानात्स्पर्शनात्तथा ॥अतोविमलकंनामतीर्थंत्रैलोक्यविश्रुतं॥ हंसप्रप
तनंनामपश्चिमायांदिशिस्थितं॥२३॥पुराययौहंससमारेभेब्रह्मलोकपिता
महः॥अथहंसोजलेनात्रनिर्मग्नोजलमध्यतः॥हंसप्रपतनंनामतेनासी
त्तीर्थमुत्तमं॥तस्यतुस्नानमात्रेणब्रह्महापित्रहातथा॥गोघ्नोवापिभ
वेद्यस्तुब्रह्मलोकंव्रजंतिते॥तस्यदक्षिणतस्तीर्थंमृणमोचनसंज्ञकं॥॥
॥२६॥तत्रस्नात्वाद्विजश्रेष्ठमुच्यतेवैऋणत्रयात्॥संगमादुत्तरेभागे
पापमोचनसंज्ञकं॥२७॥स्नानमात्रेणतस्याशुपापत्रयविमोचनं॥क
यिकंवाचिकंवापिमानसंवापियत्कृतं॥२८॥तस्याप्युत्तरतस्तीर्थंकु
शबिंदुरितिश्रुतं॥कुशाग्रजलपानेनषड्भिर्वर्षैस्तुर्यत्फलं॥२९॥तत्फलं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्नानमात्रेणनृणांभवतिकेवलं॥ भृग्वाश्रमोत्तरेरम्येधर्मारण्यमितिश्रु
तं॥३०॥ गणेश्वतुर्भिर्भगवान्महेशस्तत्रतिष्ठति॥ सप्तद्वीपवतीसेनंससशैल
वनकाननं॥३१॥ ब्रह्मादिपिप्पलीकल्पलाभेत्रैस्तृप्तिकृतं॥ नदर्दरसमंक्षे
त्रंकलौमलविनाशनं॥३२॥ केदारेवर्षसहस्राणिहरिर्बाहूदराविच॥
यस्तुष्यंकाहीवासेच्चकलौदर्दरसंगमात्॥३३॥ यस्मात्मोक्षंसुमति
भिःसदासेव्यमुमुक्षुभिः॥ यःस्नातिस्पर्शतिनृणांतेषांमुक्तिःप्रवाहु
यां॥३४॥ इतितेकथितंद्विजंदर्दरमाहात्म्यमुत्तमं॥ शृण्वंतुऋषयःस
र्वेशौनकादिमहर्षयः॥३५॥ इतिश्रीपद्मपुराणेसूतशौनकसंवादेद
र्दरमाहात्म्यंसंपूर्णं॥ संवत् १८७२ ने। षकृ ४॥ १३॥ गुरुवासरे ॥छ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi